# मूर्ति रहस्यम्

ऋषिरुवाच ॥
नन्दा भगवती नाम या भविष्यति नन्दजा ।
स्तुता सा पूजिता भक्त्या वशीकुर्या ज्जगत्त्रयम् ॥ १॥

कनकोत्तम कान्तिः सा सुकान्ति कनकाम्बरा ।
देवी कनक वर्णाभा कनकोत्तम भूषणा ॥ २॥

कमलाङ्कुश पाशाब्जैर् अलङ्कृत चतुर्भुजा ।
इंदिरा कमला लक्ष्मीः सा श्रीरुक्माम्बुजासना ॥ ३॥

या रक्तदन्तिका नाम देवी प्रोक्ता मयानघ ।
तस्याः स्वरूपं वक्ष्यामि शृणु सर्व भयापहम् ॥ ४॥

रक्ताम्बरा रक्तवर्णा रक्त सर्वाङ्ग भूषणा ।
रक्तायुधा रक्तनेत्रा रक्त केशाति भीषणा ॥ ५॥

रक्त तीक्ष्ण नखा रक्त दशना रक्त दंतिका ।
पतिं नारी वानुरक्ता देवी भक्तं भजेज्जनम् ॥ ६॥

वसुधेव विशाला सा सुमेरु युगल स्तनी ॥
दीर्घौ लम्बावति स्थूलौ तावतीव मनोहरौ ॥ ७॥

कर्कशावति कान्तौ तौ सर्वानन्द पयोनिधी ।

भक्तान्संपाययये द्देवी सर्वकाम दुघौ स्तनौ ॥ ८॥

खड्गं पात्रं च मुसलं लाङ्गलं च बिभर्ति सा ।
आख्याता रक्त चामुण्डा देवी योगेश्वरीति च ॥ ९॥

अनया व्याप्त मखिलं जगत्स्थावर जङ्गमम् ।
इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् ॥ १०॥

अधीते य इमं नित्यं रक्त दन्त्या वपुः स्तवम् ।
तं सा परिचरे द्देवी पतिं प्रिय मिवाङ्गना ॥ ११॥

शाकम्भरी नीलवर्णा नीलोत्पल विलोचना ।
गम्भीर नाभि स्त्रिवली विभूषित तनूदरी ॥ १२॥

सुकर्कश समोत्तुङ्ग वृत्त पीन घन स्तनी ।
मुष्टिं शिली मुखा पूर्णं कमलं कमलालया ॥ १३॥

पुष्प पल्लव मूलादि फलाढ्यं शाक सञ्चयम् ।
काम्यानन्त रसै र्युक्तं क्षुत्तृण्मृत्यु भयापहम् ॥ १४॥

कार्मुकं च स्फुरत्कान्ति बिभ्रती परमेश्वरी ।
शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥ १५॥

विशोका दुष्ट दमनी शमनी दुरितापदाम्
उमा गौरी सती चण्डी कालिका सा च पार्वती ॥ १६॥

शाकम्भरीं स्तुवन्ध्यायन् जपन्सम्पूजय न्नमन् ।
अक्षव्य मश्नुते शीघ्रं अन्नपानामृतं फलम् ॥ १७॥

भीमापि नीलवर्णा सा दंष्ट्रा दशन भासुरा ।
विशाल लोचना नारी वृत्त पीन पयोधरा ॥ १८॥

चन्द्रहासं च डमरुं शिरःपात्रं च बिभ्रती ।
एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता ॥ १९॥

तेजो मण्डल दुर्धर्षा भ्रामरी चित्र कान्ति भृत् ।
चित्रानुलेपना देवी चित्राभरण भूषिता ॥ २०॥

चित्र भ्रमर पाणिः सा महामारीति गीयते ।
इत्येता मूर्तयो देव्या याः ख्याता वसुधाधिप ॥ २१॥

जगन्मातु श्चण्डिकायाः कीर्तिताः कामधेनवः ।
इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया ॥ २२॥

व्याख्यानं दिव्य मूर्तीनां अभीष्ट फलदायकम् ।
तस्मात्सर्व प्रयत्नेन देवीं जप निरंतरम् ॥ २३॥

सप्त जन्मार्जितै र्घोरैर् ब्रह्महत्या समैरपि ।
पाठमात्रेण मंत्राणां मुच्यते सर्व किल्बिषैः ॥ २४॥

देव्या ध्यानं मयाख्यातं गुह्याद्गुह्यतरं महत् ।
तस्मात् सर्व प्रयत्नेन सर्वकाम फलप्रदम् ॥ २५॥

सर्वरूपमयी देवी सर्वं देवीमयं जगत् ।
अतोऽहं विश्वरूपां तां नमामि परमेश्वरीम् ॥ २६॥

इति श्रीमूर्ति रहस्यं सम्पूर्णम् ॥